# युधिष्ठिर - यक्ष संवादः

*कश्चित् यक्षः महाराजस्य युधिष्ठिरस्य ज्ञानबुद्धिपरीक्षार्थं कांश्चित् प्रश्नान् पृष्टवान् । युधिष्ठिरः तेषां प्रश्नानां समुचितानि उत्तराणि प्रदत्तवान् । महाभारतग्रन्थे अयं प्रश्नोत्तरमूलकः संवादः लभ्यते ।*

यक्ष उवाच

किंस्वित् प्रवसतो मित्रं ? किं स्विन्मित्रं गृहे सतः ?
आतुरस्य च किं मित्रं ? किं स्विन्मित्रं मरिष्यतः ? ।१।

युधिष्ठिर उवाच

विद्या प्रवसतो मित्रं भार्या मित्रं गृहे सतः ।
आतुरस्य भिषङ् मित्रं दानं मित्रं मरिष्यतः ।२।

यक्ष उवाच

मृतः कथं स्यात् पुरुषः ? कथं राष्ट्रं मृतं भवेत् ?
श्राद्धं मृतं कथं वा स्यात् ? कथं यज्ञो मृतो भवेत् ।३।

युधिष्ठिर उवाच

मृतो दरिद्रः पुरुषो मृतं राष्ट्रमराजकम्
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः ।४।

यक्ष उवाच

तपः किं लक्षणं प्रोक्तं को दमश्च प्रकीर्त्तितः ?
क्षमा च का परा प्रोक्ता ? का च ह्रीःपरिकीर्त्तिता ? ।५।

युधिष्ठिर उवाच

तपः स्वधर्मवर्त्तित्वं मनसो दमनं दमः ।
क्षमा द्वन्द्वसहिष्णुत्वं ह्रीरकार्यनिवर्त्तनम् ।६।

यक्ष उवाच

किं ज्ञानं प्रोच्यते राजन् ? कः शमश्च प्रकीर्त्तितः ?
दया च का परा प्रोक्ता ? किं चार्जवमुदाहृतम् ? ।७।

युधिष्ठिर उवाच

ज्ञानं तत्त्वार्थसम्बोधः शमश्चित्तप्रशान्तता ।
दया सर्वसुखैषित्वमार्जवं समचित्तता ।८।

यक्ष उवाच

कः शत्रुर्दुर्जयः पुंसां ? कश्च व्याधिरनन्तकः ?
कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः ? ।९।

युधिष्ठिर उवाच

क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः ।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ।१०।

यक्ष उवाच

कः पण्डितः पुमान् ज्ञेयो ?
नास्तिकः कः प्रकीर्त्तितः ?
को मूर्खः ? कश्च कामः स्यात् ?
को मत्सर इति स्मृतः ? ।११।

युधिष्ठिर उवाच

धर्मज्ञः पण्डितो ज्ञेयो नास्तिको मूर्ख उच्यते ।
कामः संसारहेतुश्च हृत्तापो मत्सरः स्मृतः ।१२।

यक्ष उवाच

को मोदते ? किमाश्चर्यं ? कः पन्थाः ? का च वार्त्तिका ?
वद मे चतुरः प्रश्नान् मृता जीवन्तु बान्धवाः ।१३।

युधिष्ठिर उवाच

पञ्चमेऽहनि षष्ठे वा शाकं पचति यो गृहे ।
अनृणी चाप्रवासी च स वारिचर ! मोदते ।१४।
अहन्यहनि भूतानि गच्छन्तीह यमालयम् ।
शेषा जीवितुमिच्छन्ति किमाश्चर्यमतः परम् ? ।१५।
तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम्।
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्था:।१६।
पृथ्वी विभाण्डं गगनं पिधानं
सूर्याग्निना रात्रिन्दिवेन्धनेन।
मासर्तुदर्वीपरिघट्टनेन
भूतानि कालः पचतीति वार्ता।१७।

**(महाभारतम् , वनपर्व )**

## अन्वया:

1. प्रवसतः किं स्वित् मित्रम् ? गृहे सतः किंस्वित् मित्रम् ? मरिष्यतः किंस्वित् मित्रम् ?
2. प्रवसतः विद्या मित्रम्, गृहे सतः भार्या मित्रम्, आतुरस्य भिषक् मित्रम्, मरिष्यतः दानं मित्रम् ।
3. कथं पुरुषः मृतः स्यात् ? कथं राष्ट्रं मृतं भवेत् ? कथं वा श्राद्धं मृतं स्यात् ? कथं यज्ञः तु मृतः भवेत्।
4. दरिद्रः पुरुषः मृतः, अराजकं राष्ट्रं मृतम्, अश्रोत्रियं श्राद्धं मृतम्, अदक्षिणः यज्ञः तु मृतः ।
5. तपः किंलक्षणं प्रोक्तम् ? कः च दमः प्रकीर्तितः ? का च परा क्षमा प्रोक्ता ? का च ह्रीः परिकीर्तिता ?
6. स्वधर्मवर्त्तित्वं तपः, मनसः दमनं दमः । द्वन्द्वसहिष्णुत्वं क्षमा, अकार्य-निवर्त्तनं ह्रीः ।
7. राजन् ! ज्ञानं किं प्रोच्यते ? कः च शमः प्रकीर्त्तितः ? का च परा दया प्रोक्ता ? किं च आर्जवम् उदाहृतम् ?
8. तत्त्वार्थसम्बोधः ज्ञानम्, चित्तप्रशान्तता शमः । सर्वसुखैषित्वम् दया, समचित्तता आर्जवम् ।
9. कः पुंसां दुर्जयः शत्रुः ? कः च अनन्तकः व्याधिः ? कीदृशः च साधुः स्मृतः ? कीदृशः असाधुः स्मृतः ?
10. क्रोधः सुदुर्जयः शत्रुः, लोभः अनन्तकः व्याधिः, सर्वभूतहितः साधुः, असाधुः निर्दयः स्मृतः ।
11. कः पुमान् पण्डितः ज्ञेयः ? कः नास्तिकः प्रकीर्त्तितः ? कः मूर्खः ? कः च कामः स्यात् ? कः मत्सरः इति स्मृतः ?
12. धर्मज्ञः पण्डितः ज्ञेयः, नास्तिकः मूर्खः उच्यते । संसारहेतुः च कामः, हृत्तापः मत्सरः स्मृतः ।
13. कः मोदते ? किम् आश्चर्यम् ? कः पन्थाः ? का च वार्त्तिका ? चतुरः प्रश्नान् (पृच्छामि), मे (उत्तरं) वद, (तव) मृताः बान्धवाः जीवन्तु ।

14. यः अहनि पञ्चमे (अंशे) षष्ठे (अंशे) वा गृहे शाकं पचति, अनृणी अप्रवासी च (भवति); वारिचर ! सः मोदते ।

15. इह अहनि अहनि भूतानि यमालयं गच्छन्ति । शेषाः जीवितुम् इच्छन्ति, अतः परम् आश्चर्यं किम् ?

16. तर्कः अप्रतिष्ठः, विभिन्नाः श्रुतयः, एकः मुनिः न अस्ति यस्य मतं प्रमाणम् । धर्मस्य तत्त्वं गुहायां निहितम्, येन महाजनः गतः सः पन्थाः (भवति) ।

17. पृथ्वी विभाण्डं, गगनं पिधानं, सूर्याग्निना , रात्रिन्दिवेन्धनेन , मास-ऋतु-दर्वी परिघट्टनेन , कालः भूतानि पचति इति वार्त्ता ।

## टिप्पणी :

**किंस्वित्** (अव्ययम्) – କ'ଣ/କିପରି, **प्रवसतः** – ପ୍ରବାସୀର, ବିଦେଶରେ ରହୁଥିବା ଲୋକର, **आतुरस्य** – ରୁଗ୍ଣର, **सतः** – ଥିବା, **भिषक्** – ବୈଦ୍ୟ/ଚିକିତ୍ସକ, **श्राद्धम्** – ପିତୃପୁରୁଷଙ୍କ ଉଦ୍ଦେଶ୍ୟରେ ପିଣ୍ଡଦାନକୁ ଶ୍ରାଦ୍ଧକହନ୍ତି, **यज्ञ** – ଯଜ୍ଞ, **अश्रोत्रियम्** – ଧର୍ମଜ୍ଞାନରେ (ବେଦାଦିରେ) ଅନଭିଜ୍ଞ, **जन्मना ब्राह्मणो ज्ञेयः संस्काराद् द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ।** **प्रोक्तम्** – କୁହାଯାଇଛି प्र + उक्तम्, **दमः** – ଦମନ, **प्रकीर्तितः** – ଖ୍ୟାତଅଟେ, **स्वधर्मवर्तित्वम्** – ନିଜଧର୍ମରେ ନିଷ୍ଠାପରତା, **द्वन्द्वः** – କଳହ (ବିବାଦ), **सहिष्णुत्वम्** – ସହନଶୀଳତା, **ह्रीः** – ଲଜ୍ଜା, **प्रोच्यते** – प्र + उच्यते କୁହାଯାଏ, **चार्जवमुदाहृतम्** – च + आर्जवम् + उदाहृतम् , **परा दया** – ସୁଦୟା, **शमश्चित्तप्रशान्तता** – शमः + चित्तप्रशान्तता - ମନର ଶାନ୍ତି, **सुखैषित्वम्** – सुख + एषित्वम् ସୁଖକାମନା, **आर्जवम्** – ସରଳତା/ସାରଲ୍ୟ, **व्याधिरनन्तक** – (व्याधिः + अनन्तकः) ଅନ୍ତହୀନରୋଗ, ଦୁରାରୋଗ୍ୟ ବ୍ୟାଧି, **सर्वभूतहितः** – ସକଳଜୀବର ହିତକାରୀ, सर्वेभ्यः भूतेभ्यः हितः, **मत्सरः** – ପରଶ୍ରୀକାତରତା, **स्मृतः** – କଥିତ, **कामः** – ଜାଗତିକ ବିଷୟଭୋଗଲାଳସା, **संसारहेतुः** – जन्ममरण रूपस्य संसारस्य कारणम् (ଜନ୍ମମରଣ କ୍ରିୟାବନ୍ଧନ ରୂପ ସଂସାରର କାରଣ), **वार्तिका** – ବାର୍ତ୍ତା/ସନ୍ଦେଶ, **शाकम्** – ବୃକ୍ଷଲତା ବ୍ୟଞ୍ଜନଯୋଗ୍ୟଫଳ ପୁଷ୍ପପତ୍ରକୁ ଶାକାନ୍ନକୁହନ୍ତି ଯାହା ସାତ୍ତ୍ୱିକ ଆହାର ଅଟେ । **अप्रवासी** – ନିଜଦେଶରେ ବାସକରୁଥିବା, ନିଜ ଘରେ ରହୁଥିବା, **अनृणी** – ଯେ ଋଣୀ ନୁହେଁ, **वारिचर** – ଜଳଚର (वकरूपधारी यक्षः ), **अहन्यहनि** – ପ୍ରତ୍ୟହ, **तर्कः** – ଅପ୍ରାମାଣିକ ଯୁକ୍ତି, **अप्रतिष्ठः** – ପ୍ରତିଷ୍ଠିତ/ପ୍ରମାଣିତ ନୁହେଁ (अप्रमाणितः), **निहितम्** – ରହିଅଛି, **गुहायाम्** – ଶାସ୍ତ୍ରରୂପକ ଗହ୍ୱରରେ, **विभाण्डम्** – ବଡ଼ପାତ୍ର, **पिधानम्** – ଢାଙ୍କୁଣୀ, **इन्धनम्** – ଜାଳେଣି, **दर्वी** – ଘାଣ୍ଟିବାପାଇଁ ବ୍ୟବହୃତ ଚାମଚ, କରଚୁଲୀ, **पचति** – ରାନ୍ଧୁଛି / ପାକକରୁଛି ।

# अभ्यासः

**1. निजभाषया प्रायशः वाक्यप्रयेण उत्तरं लिखत ।**

(क) कस्मात् कारणात् महाजनो येन गतः स पन्थाः भवति ?

(ख) संसारे किम् आश्चर्यकरम् ?

(ग) युधिष्ठिरस्य मतेन वार्त्ता का ?

(घ) पुरुष-राष्ट्र-श्राद्ध-यज्ञाः कथं मृताः भवन्ति ?

(ङ) किं किं कस्य कस्य मित्रम् ?

(च) संसारे कः मोदते ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) कः पण्डितः ज्ञेयः ?

(ख) कः असाधुः स्मृतः ?

(ग) कः शमः प्रकीर्त्तितः ?

(घ) अनन्तकः व्याधिः कः ?

(ङ) नास्तिकः कः प्रकीर्त्तितः ?

(च) तपसः लक्षणं किं प्रोक्तम् ?

(छ) आतुरस्य किं मित्रम् ?

(ज) का ह्रीः परिकीर्त्तिता ?

(झ) का परा दया प्रोक्ता ?

(ञ) कः मूर्खः उच्यते ?

(ट) आर्जवं किम् उदाहृतम् ?

(ठ) कः दमः प्रकीर्त्तितः ?

(ड) का परा क्षमा प्रोक्ता ?

(ढ) कः साधुः स्मृतः ?

(ण) पुंसां कः दुर्जयः शत्रुः ?

**3. वाक्यरचनां कुरुत ।**

किम्, स्यात्, व्याधिः, प्रश्नान्, पचति, इच्छन्ति ।

**4. सन्धिं कुरुत ।**

रात्रिन्दिवम् + इन्धनेन, व्याधिः + अनन्तकः, प्र + उक्ता, सुख + एषित्वम् , कः + च, दुः + जयः, न + एकः

**5. सन्धिविच्छेदं कुरुत ।**

अहन्यहनि, नैकः, पचतीति, साधुरसाधुः, मासर्तुः, हृतापः, जीवितुमिच्छन्ति

**6. बन्धनीमध्यात् विग्रहवाक्यं / समस्तपदं / समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) असाधुः (न साधुः, नास्ति साधुः यत्र, न एव साधुः यस्मिन्)

(ख) यमस्य आलयःतम् (यमालयेन, यमालयम्, यमालयः)

(ग) धर्मज्ञः (बहुव्रीहिः, षष्ठीतत्पुरुषः, कर्मधारयः)

(घ) हृत्तापः (हृदः तापः, हृदि तापः, हृदा तापः)

(ङ) महान् चासौ जनश्चेति (महाजनेन, महाजनः, महाजनम्)

(च) अनृणी (कर्मधारयः, नञ्तत्पुरुषः, द्विगुः)

**7. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानं पूरयत ।**

(क) दमनम् = दम् + ________ ( अनीय, ल्युट् , शतृ)

(ख) उदाहृतम् = उद् + आ + ________ + क्त । (हु, हृ, हि)

(ग) पिधानम् = अपि + धा + ________ । (शतृ, ल्युट्, अनीय)

(घ) प्रवसतः = प्र + ________ + शतृ । (वश्, वस्, वष्)

(ङ) सम्बोधः = सम् + बुध् + ________ । (क्त, क्तिन्, घञ्)

(च) जीवितुम् = जीव् + ________ । (तुमुन्, शतृ, क्त)

(छ) प्रमाणम् = प्र + मा + ________ । (ल्युट्, शतृ, क्तवतु)

■